श्री शक्तिमहिम्नः स्तोत्रम्
माँ भगवती श्रीमहात्रिपुरसुन्दरी के श्रीचरणों में
सादर सप्रेम भेंट समर्पित

ऊँ

अथ शक्तिमहिम्नःस्मोत्रम्

अथ संकल्पः :–

अस्य श्रीशक्तिमहिम्नः स्तोत्रस्य दूर्वासा ऋषिः, शार्दूल विक्रीडितछन्दः, श्रीमहात्रिपुरसुन्दरी देवता, कएईलह्रीं बीजं, हसकहलह्रीं शक्तिः, सकलह्रीं कीलकम्, श्रीमहात्रिपुर सुन्दरीदेवताप्रसादसिद्ध्यर्थे श्रीशक्तिमहिम्नः स्तोत्रपाठे विनियोगः।

अथ ऋष्यादिन्यासः :–

ऊँ अस्य श्रीशक्तिमहिम्नःस्तोत्रस्य दूर्वासा ऋर्षये नमः – शिरसि। ऊँ शार्दूलविक्रीडितछन्दसे नमः – मुखे। ऊँ श्रीमहात्रिपुरसुन्दरीदेवतायै नमः – हृदये। ऊँ कएईलह्रीं बीजाय नमः – गुह्ये। ऊँ हसकहलह्रीं शक्तये नमः – पादयोः। ऊँ सकलह्रीं कीलकाय नमः – नाभौ। ऊँ श्रीमहात्रिपुरसुन्दरी देवताप्रसादसिद्ध्यर्थे श्रीशक्तिमहिम्नःस्तोत्रपाठे विनियोगाय नमः – सर्वांगे।

ॐ कएईलह्रीं नमः	अथ करन्यासः	अथ अंगन्यासः
ॐ कएईलह्रीं नमः	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ हसकहलह्रीं नमः	तर्जनीभ्यां नमः	शिरसे स्वाहा
ॐ सकलह्रीं नमः	मध्यमाभ्यां नमः	शिखायै वषट्
ॐ कएईलह्रीं नमः	अनामिकाभ्यां नमः	कवचाय हुम्
ॐ हसकहलह्रीं नमः	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्
ॐ सकलह्रीं नमः	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट् ।

ॐ भूर्भुवःस्वरोमिति दिग्बन्धः ।

अथ ध्यानम :-

सिन्धूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्,
तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहां ।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं,
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत्परामम्बिकां ।।

श्री दुर्वासा महर्षिरुवाच :-

मातस्ते महिमा वक्तुं शिवेनापि न शक्यते ।
भक्त्याहं स्तोतुमिच्छामि प्रसीद मम सर्वदा ।।1।।

श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकीमहा
सौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्णोज्ज्वलं।
उद्यद्भानुसहस्रनूतनजपापुष्पप्रभं ते वपुः
स्वान्ते मे स्फुरतु त्रिकोणनिलयं ज्येतिर्मयं वाङ्मयं।।2।।

आदिक्षान्तसमस्तवर्णसुमणिप्रोते वितानप्रभे
ब्रह्मादिप्रतिमाभिकीलितषडाधाराब्जकक्षोन्नते
ब्रह्माण्डाब्जमहासने जननि ते मूर्तिं भजे चिन्मयीं
सौषुम्नायतपीतपंकजमहामध्यत्रिकोणस्थितां।।3।।

या बालेन्दुदिवाकराक्षिमधुरा या रक्तपद्मासना
रत्नाकल्पविराजितांगलतिकापूर्णेन्दुवक्त्रोज्ज्वला।
अक्षस्रक्सृणिपाशपुस्तककरा या बालभानुप्रभा
तां देवीं त्रिपुरां शिवां हृदि भजेऽभीष्टार्थसिद्ध्यै सदा।4।

वन्दे वाग्भवमैन्दवात्मसदृशं वेदादिविद्यागिरो
भाषा देशसमुद्भवाः पशुगतास्छन्दांसि सप्तस्वरान्
तालान्पंच महाध्वनीन्प्रकटयत्यात्मप्रकाशेन य–
त्तद्बीजं पदवाक्यमानजनकं श्रीमातृके ते परम्।।5।।

त्रैलोक्यस्फुटमंत्रतंत्रमहिमा स्वात्मोक्तिरूपं विना
यद्‌बीजं व्यवहारजालमखिलं नास्त्येव मातस्तव।
तज्जाप्यस्मरणप्रसक्तसुमतिः सर्वज्ञतां प्राप्य कः
शब्दब्रह्मनिवासभूतवदनो नेन्द्रादिभिः स्पर्धते।।6।।

मात्रा याऽत्र विराजतेऽतिविशदा तामष्टधामातृकां
शक्तिं कुण्डलिनीं चतुर्विधतनुं यस्तत्त्वविन्मन्यते।
सोऽविद्याखिलजन्मकर्मदुरितारण्यं प्रबोधाग्निना
भस्मीकृत्य विकल्पजालरहितो मातः पदं तद्‌व्रजेत्।।7।।

तत्ते मध्यमबीजमम्ब कलयाम्यादित्यवर्ण क्रिया–
ज्ञानेच्छाद्यमनन्तशक्तिविभवव्यक्तिं व्यनक्ति स्फुटं।
उत्पत्तिस्थितिकल्पकल्पिततनु स्वात्मप्रभावेन यत्
काम्यं ब्रह्महरीश्वरादिविबुधैः कामं क्रियायोजितैः।।8।।

कामान्कारणतां गतानगणितान्कार्यैरनन्तैर्मही–
मुख्यैः सर्वमनोगतैरधिगतान्मानैरनेकैः स्फुटम्।
कामक्रोधसलोभमोहमदमात्सर्यादिषट्‌कं च यत्
बीजं भ्राजयति प्रणौमि तदहं ते साधु कामेश्वरी।।9।।

यद्भक्ताखिलकामपूरणचणस्वात्मप्रभावं महा
जाड्यध्वान्तविदारणैकतरणिज्योतिः प्रबोधप्रदम्।
यद्वेदेषु च गीयते श्रुतिमुखं मात्रात्रयेणोमिति
श्रीविद्ये तव सर्वराजवशकृत्तत्कामराजं भजे।।10।।

यत्ते देवि तृतीयबीजमनलज्वालावलीसंनिभं
सर्वाधारतुरीयबीजमपरं ब्रह्माभिधाशब्दितम्।
मूर्धन्यान्तविसर्गभूषितमहौकारात्मकं तत्परं
संविद्रूपमनन्यतुल्यमभितः स्वान्ते मम द्योततां।।11।।
सर्वं सर्वत एव सर्गसमये कार्येन्द्रियाण्यन्तरा
तत्तद्दिव्यहृषीककर्मभिरियं संव्यश्नुवाना परा।
वागर्थव्यवहारकारणतनुः शक्तिर्जगद्रूपिणी
यद्बीजात्मकतां गता तव शिवे तन्नौमि बीजं परं।12।।

अग्नीन्दुद्युमणिप्रभंजनधरानीरान्तरस्थायिनी
शक्तिर्ब्रह्महरीशवासवमुखामर्त्यासुरात्मस्थिता।
सृष्टस्थावरजंगमस्थितमहाचैतन्यरूपा च या
यद्बीजस्मरणेन सैव भवती प्रादुर्भवत्यम्बिके।।13।।

स्वात्मश्रीविजिताजविष्णुमघवश्रीपूरणैकव्रतं
सद्विद्याकविताविलासलहरीकल्लोलिनीदीपकम् ।
बीजं यस्त्रिगुणप्रवृत्तिजनकं ब्रह्मेति यद्योगिनः
शान्ताः सत्यमुपासते तदिह ते चित्ते दधे श्रीपरे ।।14।।

एकैकं तव मातृके परतरं संयोगि वा योगि वा
विद्यादिप्रकटप्रभावजनकं जाड्यान्धकारापहम् ।
यन्निष्ठाश्च महोत्पलासनमहाविष्णुप्रहर्त्रादयो
देवाः स्वेषु विधिष्वनन्तमहिमस्फूर्तिं दधत्येव तत् ।।15।।

इत्थं त्रीण्यपि मूलवाग्भवमहाश्रीकामराजस्फुरत्
छक्त्याख्यानि चतुःश्रुतिप्रकटितान्युत्कृष्टकूटानि ते ।
भूतर्तुश्रुतिसंख्यवर्णविदितान्यारक्तकान्ते शिवे
यो जानाति स एव सर्वजगतां सृष्टिस्थितिध्वंसकृत् ।।16।।

ब्रह्मायोनिरमासुरेश्वरसुहृल्लेखाभिरुक्तैस्तथा
मार्ताण्डेन्दुमनोजहंसवसुधामायाभिरुत्तंसितैः ।
सोमाम्बुक्षितिशक्तिभिः प्रकटितैर्बाणांगवेदैः क्रमा–
द्वर्णैः श्रीशिवदेशिकेन विदितां विद्यां तवाम्बाश्रये ।।17।।

नित्यं यस्तव मातृकाक्षरसखीं सौभाग्यविद्यां जपेत्
संपूज्याखिलचक्रराजनिलयां सायंतनाग्निप्रभाम्।
कामाख्यं शिवनामतत्त्वमुभयं व्याप्यात्मना सर्वतो
दीव्यन्तीमिह तस्यसिद्धिरचिरात्स्यात्त्वत्स्वरूपैकता।।18।।

काव्यैर्पापठितैः किमल्पविदुषां जोघुष्यमाणैः पुनः
किं तैर्व्याकरणैर्बुधिषितया किं वाभिधानश्रिया।
एतैरम्ब न बोभवीति सुकविस्तावत्तव श्रीमतो
यावन्नानुसरीसरीति सरणिं पादाब्जयोः पावनीं।।19।।

गेहं नाकति गर्वितः प्रणतति स्त्रीसंगमो मोक्षति
द्वेषी मित्रति पातकं सुकृतति क्ष्मावल्लभो दासति
मृत्युर्वैद्यति दूषणं सुगुणति त्वत्पादसंसेवनात्
त्वां वन्दे भवभीतिभंजनकरीं गौरीं गिरीशप्रियां।।20।।

आद्यैरग्निरवीन्दुबिम्बनिलयैरम्ब त्रिलिंगात्मभि–
र्मिश्रारक्तसितप्रभैरनुपमैर्युष्मत्पदैस्तैस्त्रिभिः।
स्वात्मोत्पादितकाललोकनिगमावस्थामरादित्रयै
रुद्भूतं त्रिपुरेति नाम कलयेद्यस्ते स धन्यो बुधः।।21।।

आद्यो जाप्यतमार्थवाचकतया रूढः स्वरः पंचमः
सर्वोत्कृष्टतमार्थवाचकतया वर्णः पवर्गान्तकः।
वक्तृत्वेन महाविभूतिसरणिस्त्वाधारगो हृद्गतो
भ्रूमध्ये स्थित इत्यतः प्रणवता ते गीयतेऽम्बागमैः।।22।।

गायत्री सशिरास्तुरीयसहिता सन्ध्यामयीत्यागमै–
राख्याता त्रिपुरे त्वमेव महतां शर्मप्रदा कर्मणाम्।
तत्तद्दर्शनमुख्यशक्तिरपि च त्वं ब्रह्मकर्मेश्वरी
कर्तार्हन्पुरुषो हरिश्च सविता बुद्धः शिवस्त्वं गुरुः।।23।।

अन्नप्राणमनःप्रबोधपरमानन्दैः शिरःपक्षयुक्
पुच्छात्मप्रकटैर्महोपनिषदां वाग्भिः प्रसिद्धीकृतैः।
कोशैः पंचभिरेभिरम्ब भवतीमेतत्प्रलीनामिति
ज्योतिः प्रज्वलदुज्ज्वलात्मचपलां यो वेद स ब्रह्मवित्।24।।

सच्चित्तत्त्वमसीति वाक्यविदितैरध्यात्मविद्याशिव–
ब्रह्माख्यैरखिलप्रभावमहितैस्तत्त्वैस्त्रिभिः सद्गुरोः।
त्वद्रूपस्य मुखारविन्दविवरात्संप्राप्य दीक्षामतो
यस्त्वां विन्दति तत्त्वतस्तदहमित्यार्ये स मुक्तो भवेत्।25।।

सिद्धान्तैर्बहुभिः प्रमाणगदितैरन्यैरविद्यातमो
नक्षत्रैरिव सर्वमन्धतमसं तावन्न निर्भिद्यते।
यावत्ते सवितेव संमतमिदं नोदेति विश्वान्तरे
जन्तोर्जन्मविमोचनैकभिदुरं श्रीशाम्भवं श्रीशिवे।।26।।

आत्मासौ सकलेन्द्रियाश्रयमनोबुद्ध्यादिभिः शोचितः
कर्माबद्धतनुर्जनिं च मरणं प्रैतीति यत्कारणं।
तत्ते देवि महाविलासलहरी दिव्यायुधानां जयस्
तस्मात्सद्गुरुमभ्युपेत्य कलये त्वामेव चेन्मुच्यते।।27।।

नानायोनिसहस्रसंभववशाज्जाता जनन्यः कति
प्रख्याता जनकाः कियन्त इति मे सेत्स्यन्ति चाग्रे कति।
एतेषां गणनैव नास्ति महतः संसारसिंधोर्विधे–
र्भीतं मां नितरामनन्यशरणं रक्षानुकम्पानिधेः।।28।।

देहक्षोभकरैर्व्रतैर्बहुविधैर्दानैश्च होमैर्जपैः
संतानैर्हयमेधमुख्यसुमखैर्नानाविधैः कर्मभिः।
यत्संकल्पविकल्पजालमलिनं प्राप्यं पदं तस्य ते
दूरादेव निवर्तते परतरं मातः पदं निर्मलम्।।29।।

पंचाशन्निजदेहजाक्षरमयैर्नानाविधैर्धातुभि–
र्बह्वर्थैः पदवाक्यमानजनकैरर्थाविनाभावितैः।
साभिप्रायवदर्थकर्मफलदैः ख्यातैरनन्तैरिदं
विश्वं व्याप्य चिदात्मनाहमहमित्युज्जृम्भसे मातृके।।30।।

श्रीचक्रं श्रुतिमूलकोश इति ते संसारचक्रात्मकं
विख्यातं तदधिष्ठिताक्षरशिवज्योतिर्मयं सर्वतः।
एतन्मन्त्रमयात्मिकाभिररुणं श्रीसुन्दरीभिर्वृतं
मध्ये बैन्दवसिंहपीठललिते त्वं ब्रह्मविद्या शिवे।।31।।

बिन्दुप्राणविसर्गजीवसहितं बिन्दुत्रिबीजात्मकं
षट्कूटानि विपर्ययेण निगदेत्तारत्रिबालाक्षरैः।
एभिः संपुटितं प्रजप्य विहरेत्प्रासादमन्त्रं परं
गुह्याद्गुह्यतमं सयोगजनितं सद्भोगमोक्षप्रदम्।।32।।

आताम्रार्कसहस्रदीप्तिपरमा सौन्दर्यसारैरलं
लोकातीतमहोदयैरुपयुता सर्वोपमागोचरैः।
नानानर्घ्यविभूषणैरगणितैर्जाज्वल्यमानाभितस्
त्वं मातस्त्रिपुरारिसुन्दरि कुरु स्वान्ते निवासं मम।।33।।

शिंजन्नूपुरपादकंकणमहामुद्रासु लाक्षारसा–
लंकारांकितपादपंकजयुगं श्रीपादुकालंकृतम् ।
उद्भास्वन्नखचन्द्रखण्डरुचिरं राजज्जपासंनिभं
ब्रह्मादित्रिदशासुरार्चितमहं मूर्ध्नि स्मराम्यम्बिके ।।34।।

आरक्तच्छविनातिमार्दवयुजा निःश्वासहार्येण यत्
कौशेयेन विचित्ररत्नघटितैर्मुक्ताफलैरुज्ज्वलैः ।
कूजत्कांचनकिंकिणीभिरभितः संनद्धकांचीगुणै–
रादीप्तं सुनितम्बबिम्बमरुणं ते पूजयाम्यम्बिके ।।35।।

कस्तूरीघनसारकुंकुमरजो गन्धोत्कटैश्चन्दनै–
रालिप्तं मणिमालयातिरुचिरं ग्रैवेयहारादिभिः ।
दीप्तं दिव्यविभूषणैर्जननि ते ज्योतिर्विभास्वत्कुच–
व्याजस्वर्णघटद्वयं हरिहरब्रह्मादिपीतं भजे ।।36।।

मुक्तारत्नसुवर्णकान्तिकलितैस्ते बाहुवल्लीरहं
केयूरोत्तमबाहुदण्डवलयैर्हस्तांगुलीभूषणैः ।
संपृक्ताः कलयामि हीरमणिमन्मुक्ताफलाकीलित–
ग्रीवापट्टविभूषणेन सुभगे कण्ठं च कम्बुश्रियम् ।।37।।

तप्तस्वर्णकृतोरुकुण्डलयुगं माणिक्यमुक्तोल्लस–
द्धीराबद्धमनन्यतुल्यमपरं हैमं च चक्रद्वयं।
शुक्राकारनिकारदक्षमपरं मुक्ताफलं सुन्दरं
बिभ्रत्कर्णयुगं नमामि ललितं नासाग्रभागं शिवे।।38।।

उद्यत्पूर्णकलानिधिश्रिवदनं भक्तप्रसन्नं सदा
संफुल्लाम्बुजपत्रचित्रसुषमा धिक्कारदक्षेक्षणं।
सानन्दं कृतमन्दहासमसकृत्प्रादुर्भवत्कौतुकं
कुन्दाकारसुदन्तपंक्तिशशिभापूर्णं स्मराम्यम्बिके।।39।।

शृंगारादिरसालयं त्रिभुवनीमाल्यैरतुल्यैर्युतं
सर्वांगीनसदंगरागसुरभिश्रीमद्वपुर्दीपितम्।
तांबूलारुणपल्लवाधरयुतं रम्यं त्रिपुण्ड्रं दध–
द्भालं नन्दनचन्दनेन जननि ध्यायामि ते मंगलम्।।40।।

जातीचम्पककुन्दकेसरमहागन्धोदिगरत्केतकी
नीपाशोकशिरीषमुख्यकुसुमैः प्रोत्तंसिता धूपिता।
आनीलांजनतुल्यमत्तमधुपश्रेणीव वेणी तव
श्रीमातः श्रयतां मदीयहृदयाम्भोजं सरोजालये।।41।।

लेखालभ्यविचित्ररत्नघटितं हैमं किरीटोत्तमं
मुक्ताकांचनकिंकिणीगणमहाहीरप्रबद्धोज्ज्वलम् ।
चंचच्चन्द्रकलाकलापमहितं देवद्रुपुष्पार्चितै–
र्माल्यैरम्ब विलम्बितं सशिखरं बिभ्रच्छिरस्ते भजे ।।42।।

उत्क्षिप्तोच्चसुवर्णदण्डकलितं पूर्णेन्दुबिम्बाकृति–
च्छत्रं मौक्तिकचित्ररत्नखचितं क्षौमांशुकोत्तंसितम् ।
मुक्ताजालविलम्बितं सकलशं नानाप्रसूनार्चितं
चन्द्रोड्डामरचामराणि दधते श्रीदेवि ते स्वश्रियः ।।43।।

विद्यामन्त्ररहस्यविन्मुनिगणैः क्लृप्तोपचारार्चनां
वेदादिस्तुतिगीयमानचरितां वेदान्ततत्त्वात्मिकां ।
सर्वास्ताः खलु तुर्यतामुपगतास्त्वद्रश्मिदेव्यः परा–
स्त्वां नित्यं समुपासते स्वविभवैः श्रीचक्रनाथे शिवे ।।44।।

एवं यः स्मरति प्रबुद्धसुमतिः श्रीमत्स्वरूपं परं
वृद्धोऽप्याशु युवा भवत्यनुपमः स्त्रीणामनंगायते ।
सोऽष्टैश्वर्यतिरस्कृताखिलसुरश्रीजृम्भणैकालयः
पृथ्वीपालकिरीटकोटिवलभीपुष्पार्चितांघ्रिर्भवेत् ।।45।।

अथ तव धनुः पुण्ड्रेक्षुत्वात्प्रसिद्धमतिद्युति–
स्त्रिभुवनवधूमुद्यज्ज्योत्स्नाकलानिधिमण्डलम् ।
सकलजननि स्मारं स्मारं गतः स्मरतां नर–
स्त्रिभुवनवधूमोहाम्भोधेः प्रपूर्णविधुर्भवेत् ।।46।।

प्रसूनशरपंचकप्रकटजृम्भणागुम्फितं
त्रिलोकमवलोकयत्यमलचेतसा चंचलम् ।
अशेषतरुणीजनस्मरविजृम्भणे यः सदा
पटुर्भवति ते शिवे त्रिजगदंगणा क्षोभणे ।।47।।

पाशं प्रपूरितमहासुमतिप्रकाशो
यो वा तव त्रिपुरसुन्दरि सुन्दरीणाम् ।
आकर्षणेऽखिलवशीकरणे प्रवीणं
चित्ते दधाति स जगत्त्रयवश्यकृत्स्यात् ।।48।।

यः स्वान्ते कलयति कोविदस्त्रिलोकी–
स्तम्भारम्भणचणमत्युदारवीर्यम् ।
मातस्ते विजयनिजांकुशं सयोषा
देवांस्स्तम्भयति भूभुजोऽन्यसैन्यम् ।।49।।

चापध्यानवशाद्भवोद्भवमहामोहं महाजृम्भणं
प्रख्यातं प्रसवेषु चिन्तनवशात्तत्तच्छरव्यं सुधीः।
पाशध्यानवशात्समस्तजगतां मृत्योर्वशित्वं महा–
दुर्गस्तम्भमहांकुशस्य मननान्मायाममेयां तरेत्।।50।।

न्यासं कृत्वा गणेशग्रहभगणमहायोगिनीराशिपीठैः
षड्भिः श्रीमातृकार्णैः सहितबहुकलैरष्टवाग्देवताभिः।
सश्रीकण्ठादियुग्मैर्विमलनिजतनौ केशवाद्यैश्च तत्त्वैः
षट्त्रिंशद्भिश्च तत्त्वैर्भगवति भवतीं यः स्मरेत्स त्वमेव।51।।

सुरपतिपुरलक्ष्मीजृम्भणातीतलक्ष्मीः
प्रभवति निजगेहे यस्य दैवं त्वमार्ये।
तव विविधकलानां पात्रभूतस्य तस्य
त्रिभुवनविदिता सा जृम्भते कीर्तिरच्छा।।52।।

मातस्त्वं भूर्भुवःस्वर्महरसि नृतपःसत्यलोकैश्च सूर्ये–
न्द्वारज्ञाचार्यशुक्रार्किभिरपि निगमब्रह्मभिः प्रोतशक्तिः।
प्राणायामादियत्नैः कलयसि सकलं मानसं ध्यानयोगं
येषां तेषां सपर्या भवति सुरकृता ब्रह्म ते जानते च।53।

क्व मे बुद्धिर्वाचा परमविदुषो मन्दसरणिः
क्व ते मातर्ब्रह्मप्रमुखविदुषामाप्तवचसाम्।
अभून्मे विस्फूर्तिः परतरमहिम्नस्तव नुतिः
प्रसिद्धं क्षन्तव्यं बहुलतरचापल्यमिह मे।।54।।

प्रसीद परदेवते मम हृदि प्रभूतं भयं
विदारय दरिद्रतां दलय देहि सर्वज्ञताम्।
निधेहि करुणानिधे चरणपद्मयुग्मं स्वकं
निवारय जरामृती त्रिपुरसुन्दरि श्रीशिवे।।55।।

इति त्रिपुरसुन्दरीस्तुतिमिमां पठेद्यः सुधीः
स सर्वदुरिताटवीपटलचण्डदावानलः।
भवेन्मनसि वांच्छितं प्रतितसिद्धिवृद्धिर्भवे–
दनेकविधसंपदां पदमनन्यतुल्यो भवेत्।।56।।

पृथ्वीपालप्रकटमुकुटस्रग्रजोराजितांघ्रि
र्विद्वत्पुंजानतिनुतिसमाराधितो बाधितारिः।
विद्याः सर्वाः कलयति हृदा व्याकरोति प्रवाचा
लोकाश्चर्यैर्नवनवपदैरिन्दुबिम्बप्रकाशैः।।57।।

संगीतं गिरिजे कवित्वसरणिं चाम्नायवाक्यसृतेः
व्याख्यातं हृदि तावकीनचरणद्वन्द्वं च सर्वज्ञताम्।
श्रद्धां कर्मणि कालिकेऽतिविपुलश्रीजृम्भणं मन्दिरे
सौन्दर्यं वपुषि प्रकाशमतुलं प्राप्नोति विद्वान्कविः।।58।।

भूष्यं वैदुष्यमुद्यद्दिनकरकिरणाकारमाकारतेजः
सुव्यक्तं भक्तिमार्गं निगमनिगदितं दुर्गमं योगमार्गं।
आयुष्यं ब्रह्मपोष्यं हरगिरिविशदां कीर्तिमभ्येत्य भूमौ
देहान्ते ब्रह्मपारं परशिवचरणाकारमभ्येति विद्वान्।।59।।

दुर्वाससा महितदिव्यमुनीश्वरेण
विद्याकलायुवतिमन्मथमूर्तिनैतत्।
स्तोत्रं व्यधायि रुचिरं त्रिपुराम्बिकायाः
वेदागमैकपटलीविदितैकमूर्तेः।।60।।

सदसदनुग्रहनिग्रह, गृहीतमुनिविग्रहो भगवान्।
सर्वासामुपनिषदां, दुर्वासा जयति देशिकः प्रथमः।।61।।

प्रकाशकः–

श्री स्वामी शान्तिधर्मानन्द सरस्वती
सत्यं साधना कुटीर
181, ग्रामः गौहरी माफी, पोस्टः रायवाला,
तहः ऋषिकेश, जिलाः देहरादून, उत्तराखण्ड.
मोः 9557130251, ईपत्रः swsdsr@gmail.com